# Dashavatara Stutih 2

# दशावतारस्तुतिः २

## Document Information

Text title : Dashavatara Stutih 2 In Praise of Vishnu in His Ten Incarnations

File name : dashAvatArastutiH2.itx

Category : vishhnu, dashAvatAra, stotra, kShemendra, vishnu

Location : doc_vishhnu

Author : Kshemendra

Transliterated by : M N Ramanuja

Proofread by : M N Ramanuja

Description-comments : kShemendravirachite dashAvatAracharite

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

Dashavatara Stutih 2

# दशावतारस्तुतिः २

अशेषविश्ववैचित्र्यरचनारुचये नमः ।
मायागहनगूढाय नानारूपाय विष्णवे ॥ १॥

देवः पायादपायात् त्रिभुवनभवनस्तम्भभूतः स युष्मा-
नायुष्मान् यस्य भक्त्या प्रभवति पुरुषः स्वर्गमार्गेऽपवर्गे ।
मत्स्यः कूर्मो वराहः पुरुषहरिवपुर्वामनो जामदग्न्यः
काकुत्स्थः कंसहन्ता स च सुगतमुनिः कर्किनामा च विष्णुः ॥ २॥

आदि मत्स्यः स जयताद् यः श्वासोच्छ्वासितैर्जलैः ।
गगने विदधेऽम्भोधिं गगनं च महोदधौ ॥ ३॥

तं नमस्कुर्महे कूर्मं यः कवाटमसङ्कटम् ।
अतीतसर्वब्रह्माण्डमवशेषमिवावहत् ॥ ४॥

वराहं नौमि सानन्ता येनोत्क्षिप्ता क्षितिः परम् ।
अधोधृतार्धच्छत्रेव तलस्थार्कातपासहा ॥ ५॥

जयाय नृहरिर्वोऽस्तु दैत्योरः शोणितार्णवे ।
हारमौक्तिकगर्भास्ताश्चेरुर्यन्नखशुक्तयः ॥ ६॥

त्रिविक्रमोऽस्तु भूत्यै वः प्राग् लघ्वी मध्यमा ततः ।
यस्य पश्चादनन्ताभूत् सत्सङ्गतिरिवाकृतिः ॥ ७॥

अभग्नं जामदग्न्यो वः प्रयच्छतु जयोदयम् ।
यत्कुठारकठोराग्नौ भूपालैः शलभायितम् ॥ ८॥

नौमि रामं रिपोश्चक्रे यः काञ्चननिभैः शरैः ।
होमानलशिखारूढमिव वक्त्रवनं पुनः ॥ ९॥

शौरिर्जयति कंसस्य जीवितप्रथमातिथिः ।
यश्चक्रे चक्रदानेन बाणबाहुप्रतिग्रहम् ॥ १०॥

यस्य सभ्रूभ्रमाकम्पा माररामाः ससैनिकाः ।
चक्रुर्न रागं न द्वेषं स शान्त्यै सुगतोऽस्तु वः ॥ ११॥

स्वच्छन्दप्रोच्छलन्म्लेच्छतिमिरोद्भेदसच्छविः ।
कर्किविष्णुः प्रकाशाय प्रभातार्क इवास्तु वः ॥ १२॥

अवतारकथायुक्त्या भक्त्या भगवतो हरेः ।
श्रीव्यासदासः क्षेमेन्द्रः कुरुते सरसां स्तुतिम् ॥ १३॥

इति महाकविश्रीक्षेमेन्द्रविरचिते दशावतारचरिते
दशावतारस्तुतिः समाप्ता ॥ (१।१-१३)

Encoded and proofread by M N Ramanuja

*Dashavatara Stutih 2*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*